**International Research Journal of Human Resource and Social Sciences**
**ISSN(O): (2349-4085) ISSN(P): (2394-4218)**
**Impact Factor 5.414 Volume 5, Issue 8, August 2018**
**Website-** www.aarf.asia, **Email** : editoraarf@gmail.com

# न्यायदर्शने असद्धेतुनिरूपणम्

डाँ.ज्योतिप्रकाशनन्दः

हेतुरिव भासते न तु वस्तुतो हेतुः इति व्युत्पत्त्या दुष्टहेतुः हेत्वाभासशब्दस्यार्थः। दुष्टश्च दोषवान्। अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति दीपिकायां लक्षणम्। तथा चानुमितेः प्रतिबन्धकं यद्यथार्थज्ञानं तस्य विषय एव हेत्वाभास इत्यर्थः फलितः। परन्त्वस्य लक्षणस्य स्वीकारे व्यभिचारादिषु हेत्वाभासेष्वव्याप्तिः। तेषु न कस्यापि निश्चयोऽनुमितेः प्रतिबन्धकः । किन्तु परामर्शस्य प्रतिबन्धकः। अतोऽनुमिति-पदस्य लक्षणस्थस्याजहल्लक्षणया अनुमितिस्तत्करणान्यतरपरत्वं स्वीकार्यम्। तेन च व्यभिचारादिज्ञानस्य परामर्शप्रतिबन्धकतया एव निर्वाहादनुमित्यप्रतिबन्धकत्वेऽपि व्यभिचारादिषु नाव्याप्तिः। तथा चानुमितिः परामर्शान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति लक्षणं सम्पन्नम्। परन्तु स्वीकृतेऽप्यस्य लक्षणे ह्रदो वह्निमानित्यनु-मितिस्थले घटवद्ह्रदे लक्षणातिव्याप्तिः। यतो वह्न्यभावात् ह्रदो घटवान् च इति समूहालम्बनात्मकनिश्चयो ह्रदो वह्निमान् इत्यनुमितेः प्रतिबन्धकः। अतोऽनुमितित्वपरार्म-त्वान्यतरव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकयथार्थज्ञानीयविषयताश्रयत्वं हेत्वाभासत्वमिति स्वीकार्यम्। केवलं 'घटवान् ह्रदः' इति निश्चयो नोक्तान्यतरप्रतिबन्धकः। अतस्तस्य विषयता नोक्तप्रतिबन्धकतावच्छेदिका। ज्ञानांशे यथार्थपददानेन 'पर्वतो वह्निमान्' इत्यनुमितिस्थले 'पर्वतो वह्न्यभाववान्' इति भ्रमविषयीभूत केवलं वह्न्यभावः केवलपर्वतेऽतिव्याप्तिवारणार्थम्। परन्तु 'ह्रदो वह्न्यभाववान्' इत्याकारकानुमितिस्थले ह्रदो वह्न्यभाववान् इतिरूपं यथार्थज्ञानीयविषयताया आश्रयः। अतः केवल वह्न्यभावे ह्रदे

© **Associated Asia Research Foundation (AARF)**

चातिव्याप्तिः। अतो वक्तव्यं यद्यादृशविशिष्टविषयकत्वमुक्तप्रतिबन्धकताननतिरिक्तवृत्तिः। तादृशविशिष्टत्वं हेत्वाभासत्वमिति ।

षोडशपदार्थेषु तिस्रः कथा विचारिताः। तत्र वादजल्पवितण्डानामाधेयानां हेत्वाभासानां कथात्वेन परिहीयते। वादजल्पवितण्डानां कृते हेत्वाभासस्यावश्यकं विशेषज्ञानम्। अतो न्यायसूत्रे वितण्डायाः परं हेत्वाभासो विचारिस्ततः पञ्चविधहेत्वाभासानां लक्षणमुक्तम्।

न्यायभाष्यकारेण वात्स्यायनेन हेतुलक्षणाभावादहेतवो हेतुसामान्यात् हेतुवदा-भासमाना हेत्वाभासा इत्युक्तम्। हेतुवदाभासन्ते ये पदार्था वस्तुतो न हेतवः किन्तु हेतुसादृश्यवशतो हेतुवत्प्रतीयन्ते इति व्युत्पत्त्या हेत्वाभासशब्दो दुष्टहेतुसमूह इति। यद्यप्येतेन हेतवस्तथापि हेतुसादृश्यवशाद्धेतुशब्दस्य गौणप्रयोगः। न्यायबोधिन्यां गोवर्द्धनमिश्रेणापि हेतुवदाभासन्ते इति हेत्वाभासा दुष्टहेतव इत्यर्थ उक्तम्। दुष्टहेतुश्च व्यभिचारादिदोषविशिष्टः। अतो हेतोः समस्तलक्षणाभावात् स न प्रकृतहेतुः। अत एवोक्तं भाष्यकारेण 'हेतुलक्षणाभावादहेतव' इति। परन्तु एते पदार्था यदि हेतुसदृशा न भवन्ति तर्हि ते हेत्वाभासा भवितुं नार्हन्ति। हेत्वाभासपदार्थे किं सादृश्यमिति चेत् ? उच्यते उद्योतकरेण प्रतिज्ञावाक्यतः परम् – यथा प्रकृतहेतुः प्रयोगस्तथैव हेत्वाभासप्रयोगोऽपि भवतीति सादृश्यम्। पश्चात्तेनैवोक्तं यत्, अथवा दुष्टहेतौ प्रकृतहेतौ कस्यापि धर्मस्य सत्त्वात् । तदैवोभयसादृश्यमिति। प्राचीनानां मते प्रकृतहेतौ कस्यापि धर्मस्यासत्त्वे तस्य न हेत्वाभासत्वम्। अत एव वरदाराजेनोक्तम् –

'हेतोः केनापि रूपेण रहिताः कैश्चिदन्विताः ।
हेत्वाभासाः पञ्चधा ते गौतमेन प्रपञ्चिताः ।।' इति ।

अनुमितिस्थले कः प्रकृतहेतुरिति बोध्यम्। महर्षिणा गौतमेन हेतुवाक्यस्थलक्षण-सूत्रे साध्यसाधनमिति लिखितम्। तेन च संक्षेपतः साध्यसाधनत्वं हेतुपदार्थलक्षणमिति बोध्यम् । परन्तु कीदृशपदार्थः साध्यधर्मस्य

साधनमिति बोध्यम् ? महर्षिणा गौतमेन पञ्चविधहेत्वाभासानां वर्णिततत्वात् पञ्चलक्षणसम्पन्नपदार्थः साध्यसाधनरूप इति । अयमेव गमकहेतुः इत्युच्यते ।

परवर्त्तिभिर्न्यायाचार्यैस्तत्पञ्चलक्षणं व्यपदिष्टम्। तथाहि – पक्षसत्त्वं–सपक्षसत्त्वं–विपक्षासत्त्वमसत्प्रतिपक्षत्वमबाधितत्वञ्चेति। यस्मिन् स्थले सपक्षो नास्ति यस्मिन् स्थले च विपक्षो नास्ति तस्मिन् स्थले यथाक्रमं सपक्षासत्वं विपक्षासत्त्वञ्च परित्येज्यापरे चत्वारो धर्माः हेतुलक्षणरूपा भवन्ति ।

तर्कसंग्रहे 'सन्दिग्धसाध्यवान् पक्षः' इति पक्षलक्षणं वर्त्तते। अतः एतादृशपक्षे विद्यमानत्वमेव पक्षसत्त्वम्। सपक्षस्तु निश्चितसाध्यवान्। तत्र विद्यमानत्वं सपक्षसत्त्वम्। विपक्षस्तु निश्चितसाध्याभाववान् । विपक्षेऽविद्यमानत्वं विपक्षासत्त्वमिति। असत्प्रतिपक्षत्वं तुल्यबलविरोधित्वम्। अबाधितत्वन्तु बलवत्प्रमाणेन साध्यधर्माभावानिश्चयत्वम्।

एतेषु पञ्चसद्धेतुषु विपक्षासत्त्वस्याभावे सव्यभिचारः, सपक्षसत्त्वाभावे विरुद्धः। असत्प्रतिपक्षस्याभावे प्रकरणसमः। पक्षसत्त्वाभावे साध्यसमः। अबाधितत्वाभावे कालातीत इति हेत्वाभासा भवन्ति।

पञ्चहेत्वाभासेषु न्यायभाष्ये सव्यभिचारहेत्वाभासः प्रथमतो विचार्यते। महर्षिणा गौतमेन सव्यभिचारोऽनैकान्तिकः[१] इति सूत्रमुक्तम्। व्यभिचारशब्देनैकत्राव्यवस्थितिः। अत एव व्यभिचारेण सह वर्त्तत इति सव्यभिचारः। अव्यवस्थितिशब्दस्य नियमाभाव–रूपार्थस्वीकारात्सव्यभिचारशब्देन व्यभिचारविशिष्टत्वं ग्राह्यम्।

उक्तञ्च न्यायभाष्ये निदर्शनम् – 'नित्यः शब्दोऽस्पर्शत्वात्, स्पर्शवान् कुम्भोऽनित्यो दृष्टो न च तथा स्पर्शवान् शब्दस्तस्मादस्पर्शत्वान्नित्यः शब्द इति। दृष्टान्ते स्पर्शवत्त्वमनि–त्यत्वञ्च धर्मो न साध्यसाधनभूतौ गृह्येते, स्पर्शवांश्चाणुर्नित्यश्चेति। आत्मादौ च दृष्टान्ते उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः इत्यस्पर्शत्वादिति हेतुनित्यत्वं व्यभिचरति, अस्पर्शा बुद्धिरनित्या चेति। एवं द्विविधेऽपि दृष्टान्ते व्यभिचारात् साध्यसाधनभावो नास्तीति लक्षणाभावादहेतुरिति [२]।'

अनैकान्तिकः सव्यभिचार इत्यत्रानैकान्तशब्दोऽपि अनेकान्तिकशब्दनाम्ना गीयते। महर्षिणा गौतमेनापि सूत्रे[३]ऽनैकान्तशब्दस्य प्रयोगः कृतः ।

तार्किकरक्षायां वरदराजोऽपि – तत्र सव्यभिचारः स्यादनैकान्तः स च द्विधा एकत्रान्तो निश्चयो व्यवस्थितिर्नास्तीति ।

अनैकान्तिकः सव्यभिचार इत्यत्र लक्ष्यनिर्देशलक्षणकथनयोः सूचनमिति वाचस्पतिमिश्राः। तथा च योऽनैकान्तिकः स सव्यभिचारः। यश्च सव्यभिचारः स एवानैकान्तिक इति महर्षेरभिप्रायः। यस्यानैकान्तिकपदार्थोऽप्रसिद्धः प्रसिद्धश्च सव्यभि–चारपदार्थः तं प्रति अनैकान्तिक इति लक्ष्यनिर्देशः सव्यभिचार इति लक्षणम्। लोके य एकस्मिन् पक्षे न नियतः किन्तूभयपक्षे नियतः स एवानैकान्तिक इति प्रसिद्धः।

अनैकान्तिकस्त्रिविधः साधारणासाधारणानुपसंहारिभेदात्। अत एव साधारणा–द्यन्यतमत्वमनैकान्तिकत्वमिति तत्सामान्यलक्षणम् ।

तत्र साधारणत्वं साध्याभाववद्वृत्तित्वम्[४] । तेन साध्यतावच्छेदकधर्मसम्बन्धा–वच्छिन्नप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतावानित्यर्थः। अस्याः पङ्क्ते परिष्कारो बालप्रियायां जातः। तथाहि – साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वानिवेशे 'पर्वतो वह्निमान्, धूमात्' इत्यत्र धूमस्यापि साधारणहेत्वाभासत्वापत्तिः। तथा हि – साध्यो वह्निः तन्निष्ठप्रतियोगितानिरूपकोऽभावो महानसीयवह्न्यभावोऽपि तद्वान् पर्वतः तन्निरूपितवृत्तित्वस्य धूमे सत्त्वादिति। साध्यताव–च्छेदकधर्मावच्छिन्नत्वस्य प्रतियोगितायां निवेशे तु महानसीयवह्न्यभावो ग्रहीतुं न शक्यते, तस्य महानसीयत्वसहितवह्नित्वावच्छिन्नप्रतियोगिताकत्वेऽपि केवल वह्नित्वावच्छिन्न–प्रतियोगिताकत्वाभावात्। अपि तु वह्निर्नास्तीति प्रतीतिसिद्धो वह्निसामान्याभाव एव वह्नित्वावच्छिन्नप्रतियोगिताकः तद्वान् ह्रदादिः तन्निरूपिताधेयत्वं धूमे नास्तीति नातिव्याप्तिः। एवं साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे 'पर्वतो वह्निमान् धूमात्' इत्यत्रैव समवायेन वह्निर्नास्तीति प्रतीतिसिद्धस्य समवायसम्बन्धा–

वच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभावस्यापि लक्षणघटकतया तद्वान् पर्वतोऽपि तत्र संयोगेन वह्नेः सत्त्वेऽपि समवायेन वह्नेरभावात्, पर्वतनिरूपितवृत्तित्वस्य च धूमे सत्त्वादतिव्याप्तिः । साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे तु संयोगसम्बन्धाव-च्छिन्नवह्न्यभावस्यैव ग्राह्यतया तद्वान् ह्रदादिरेव तन्निरूपिताधेयत्वं धूमे नास्तीति नातिव्याप्तिः इति ।

न्यायसिद्धान्तमुक्तावल्यां पञ्चहेत्वाभासा विवृताः। उक्तञ्चात्र –

'अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासस्तु पञ्चधा [५]।।' इति ।

अत्रानैकान्तशब्देन सव्यभिचारो गृह्यते। तत्र च मुक्तावल्याम् – साधारणाद्यन्यतम-त्वमनैकान्तिकत्वमिति स्पष्टम्। साध्यवदन्यवृत्तिः साधारणः। साधारणहेत्वाभासद्वारा व्याप्तिज्ञानप्रतिबन्धः क्रियते। साध्यसमानाधिकरणो हेतुरसाधारणः। तेन साध्यसामानाधि-करण्यग्रहः प्रतिवद्ध्यते । अनैकान्तिकस्य भेदत्रितयं द्विसप्ततिकारिकयामुक्तम्। तथाहि –

'आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।
तत्रैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् [६]।।' इति ।

तत्र 'यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः[७]' इति साधारणानैकान्तिकस्य लक्षणप्रतिपादनात्सपक्षविपक्षवृत्तिः साधारण इति लक्षणार्थोऽवबोध्यते। यथा 'पर्वतो वह्निमान्, प्रमेयत्वात्' इत्यत्र सपक्षे महानसे जलह्रदादौ च वर्त्तते। प्रमेयत्वमीश्वरीय-प्रमाविषयत्वं वा। सपक्षस्तु तत्र निश्चितसाध्यवान्। तथा च विशेष्यताख्यविषयता-सम्बन्धेन साध्यप्रकारकनिश्चयविशिष्टः सपक्षः। यथा वह्निमन्महानस इति भावः फलितः। विपक्षश्च साध्यवद्भिन्नः। तथा च निश्चितसाध्याभाववानित्यत्र विशेष्यताख्यविषयता-सम्बन्धेन साध्याभाववत्त्वावच्छिन्नप्रतियोगिताकभेदप्रकारकनिश्चयविशिष्टः इत्यर्थो बोध्यते। यथा – 'वह्न्यभाववान्

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

जलह्रदः’ इति। कारिकायां विरुद्धवारणाय सपक्षवृत्ति–त्वमुक्तम् । ‘शब्दो नित्यः कृतकत्वात्’ इत्यत्र विरुद्धे कार्यत्वे हेतौ नित्यत्वाभाववत्यनित्ये वर्त्तमानत्वादतिव्याप्तिः। अतस्तन्निवारणार्थं सपक्षवृत्तित्वमिति पदम्। तेन च निश्चित–नित्यत्ववति परमाप्वादौ कृतकत्वस्याविद्यमानत्वाद्वारणं बोध्यमिति। ‘शब्दो गुणः चाक्षुषत्वात्’ इत्यत्र स्वरूपासिद्धेः अतिव्याप्तिवारणाय पक्षवृत्तित्वनिवेशनम्। वस्तुत एतेन गौरवं दृश्यते। लाघवदृष्ट्या विपक्षवृत्तित्वमेव वाच्यम्। विरुद्धस्य साधारणत्वेऽपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यादिति न्यायसिद्धान्तमुक्तावलीवचनम्। दूषकताबीजन्तु विरुद्धज्ञानस्य सामानाधिकरणत्वग्रहप्रतिबन्धकत्वम्। साधारण–व्यभिचारज्ञानस्याव्यभिचारग्रहप्रतिबन्धकत्वम्। स्वरूपासिद्धिज्ञानस्य च परामर्श–प्रतिबन्धकत्वमिति। तेन च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रति–योगिताकभेदप्रकारकनिश्चयविशिष्टवृत्तिहेतुः साधारणव्यभिचार इत्यर्थः सिद्ध्यति ।

‘यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः[८]’ इति कारिकायामसाधारण–व्यभिचारं लक्षयति विश्वनाथपञ्चाननः। उभयपदेनात्र सपक्षविपक्षव्यावृत्त इत्यर्थो गृह्यते। अत्र सपक्षः साध्यवत्तया निश्चितः। तेन च विशेष्यतासम्बन्धेन साध्यप्रकारकनिश्चय–विशिष्ट इत्यर्थः। अत्र विपक्षः साध्यशून्यतया निश्चितः। तथ च विशेष्यतासम्बन्धेन साध्याभावप्रकारकनिश्चयविशिष्टमिति फलितम्। अत्र निश्चयघटितसपक्षत्वस्य विपक्षत्वस्य च किं प्रयोजकं निवेशनम् ? तदर्थमुच्यते – ‘शब्दोऽनित्यः शब्दत्वात्’ इति। यदा शब्दानित्यत्वस्य सन्देहः; यथा शब्दोऽनित्यो न वेति रूपस्तदा शब्दो न सपक्षो विपक्षो वा भवति । निश्चतसाध्यवत्त्वाभावान्निश्चितसाध्याभाववत्त्वाभावाच्च। किन्तु सपक्षो घटादिविपक्षः परमाण्वादिः। तद्व्यावृतं घटाद्यवृत्तित्वं परमाण्वाद्यवृत्तित्वञ्च शब्दात्मकहेतोर्भवति । अतस्तदसाधारणव्यभिचारीत्यर्थः ।

‘तथैवानुपसंहारी केवलान्वयिपक्षकः[९]’ इत्यनुपसंहारिलक्षणं केवलान्वयि इत्यनेनात्यन्ताभावाप्रतियोगिपक्षो यस्य सः केवलान्वयिपक्षकः, तथा च केवलान्वयि–धर्मावच्छिन्नपक्षक इति

यावदिति प्राचीनाः। अनुपसंहारिण उदाहरणम् – 'सर्वमभिधेयं प्रमेयत्वात्'। अत्राभिधेयपदेनेश्वरेच्छाविषयत्वं ग्राह्यम्। प्राचीनन्यायेऽभिधाया ईश्वरेच्छाया अभिधेयत्वेन स्वीकारात् । प्रमेयत्वेन चेश्वरीयप्रमाविषयत्वं ग्राह्यम्। अत्र सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः ।

प्राचीनमतं नव्याः खण्डयन्ति। तत्र कारणं सर्वस्यैकदेशेन घटे साध्यहेत्वोः सामानाधिकरण्यग्रहे जायमाने केवलान्वयिपक्षकत्वस्यानुपसंहारिकत्वस्य क्षतेरभावात्।

विरुद्धहेत्वाभासो विचार्यते । विरुद्धस्तु सिद्धान्तमभ्युपेत्यतद्विरोधीति । तद्विरुणद्धीति तद्विरोधी अभ्युपेत्य सिद्धान्तं व्याहन्तीति । तेन च स्वीकृतसिद्धान्त–व्याघातको हेतुर्विरुद्धहेत्वाभासनाम्ना गीयते। भाष्यकारेणोदाहरणं तदर्थं दत्तम् – सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधादित्यादि। अत्रायम्भावः सांख्यसम्प्रदाये महदादय–स्त्रयोविंशतिर्विकारा वर्त्तन्ते। समस्तविकारभूतपदार्थेषु तत्तत्परिणामरूपो यदात्मलाभः सा एव व्यक्तिरभिव्यक्तिर्वा । परन्त्वियमभिव्यक्तिर्न चिरस्थायिनी । अत एवोच्यते न नित्यो विकार उपपद्यते। अपगतोऽपि विकारोऽस्ति विनाशप्रतिषेधात् । तेन च सोऽयं नित्यत्वप्रतिषेधादिति हेतुव्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुद्ध्यते इति ।

वस्तुतः सांख्यनये मूलप्रकृतिः पुरुषतो भिन्ना सर्वेऽपि पदार्था यद्यप्यनित्यास्तथापि प्रलयकाले तेषां सर्वेषां पदार्थानां नात्यन्तिकध्वंसः। किन्तु मूलप्रकृतौ तिरोभावः। तेन च मूलप्रकृतिरूपेण तेषां सत्त्वान्मूलप्रकृतिरूपेण तेषां नित्यत्वमव्याहतम् । अतः कथञ्चिन्नित्यत्वमनित्यत्वञ्च तेषां न विरुद्धम् । परन्त्वसत्कार्यवादिनां नैयायिकानां मते परिणामवादो न स्वीकृतः । अतस्तन्मतानुसारं कस्यापि पदार्थस्य मूलकारणरूपेण विद्यमानता असम्भवा । अतो जन्यभावपदार्थमात्रस्यात्यन्तविनाशः। अतः कस्यापि पदार्थस्य कथञ्चिन्नित्यत्वं कतञ्चिदनित्यत्वं न सम्भवति ।

सांख्यमते स्वस्वीकृतपूर्वसिद्धान्तस्य विरोधदर्शनाद्विरुद्धहेत्वाभासः। कथमित्यत्रो–च्यते भाष्यकारः – कथम् ? व्यक्तिरात्मलाभः, अपायः प्रच्युतिः यद्यात्मलाभात्प्रच्युतो विकारोऽस्ति, नित्यत्वप्रतिषेधो नोपपद्यते, यद्व्यक्तेरपेतस्यापि विकारस्यास्तित्वं, तत्खलु नित्यत्वमिति । नित्यत्वप्रतिषेधो नाम

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

विकारस्यात्मलाभात्प्रच्युतेरुपपत्तिः । यदात्मलाभात् प्रच्यवते तदनित्यं दृष्टं, यदस्ति न तदात्मलाभात् प्रच्यवते । अस्तित्वञ्चात्मलाभात् प्रच्युतिरिति विरुद्धावेतौ धर्मौ न सह सम्भवत इति । सोऽयं हेतुर्यं सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति [१०]।

कारिकावल्याम् – 'यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः[११]' इति विरुद्धहेत्वा-भासस्य स्वरूपं विश्वनाथपञ्चाननेन विवृतम् । तेन च साध्यवत्त्वाच्छेदेन हेत्वाभावो बोधितः। तथा च यो हेतुः साध्याधिकरणे महानसादौ न वर्त्तते स हेतुर्विरुद्धो नाम हेत्वाभासः। अयञ्च विरुद्धो विधिसाधने त्रिविधः, साक्षात्साध्याभावव्याप्यत्वात् साध्यव्यापकाभावव्याप्यत्वात्साध्यव्यापकविरुद्धोपलम्भात्। निषेधसाधनेऽपि त्रिविधः प्रतियोग्योपलम्भात्साध्यव्यापकाभावोपलम्भात्साध्यव्यापकविरुद्धोपलम्भात्। न्याय-सिद्धान्तमुक्तावल्याञ्चोक्तम् – 'साध्यव्यापकीभूताभावप्रतियोगित्वं' विरुद्धहेत्वाभास-लक्षणम् ।

न्यायसूत्रे तृतीयहेत्वाभासत्वेन प्रकरणसमो व्याख्यातः। 'यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः[१२]' इति प्रकरणसमलक्षणम् । प्रकरणशब्दोऽर्थत्वेन भाष्यकारेण संशयविषयीभूतः पक्षः प्रतिपक्षश्चेति बुद्ध्यते । वस्तुतः प्रक्रियते साध्यत्वे-नाधिक्रियते यदिति व्युत्पत्त्या प्रकरणशब्देन वादिप्रतिवादिनोः साध्यत्वरूपेण धर्मद्वयं बोध्यते । तद्धर्मद्वयं यद्यपि परस्परं विरुद्धं तथापि मध्यस्तानां संशयविषयीभूतं सत्पक्ष-प्रतिपक्षनाम्ना अभिहितम् । तदर्थं न्यायभाष्ये विमर्शाधिष्ठानौ पक्षप्रतिपक्षावुभावनवसितौ प्रकरणमित्युच्यते । अत्रानवसितौ इत्यस्य शब्दस्य निर्णितत्वमर्थः । निश्चयार्थस्याव-पूर्वकस्य सो धातोरुत्तरेण कर्मवाच्येन क्तप्रत्ययनिष्पन्नावसितशब्दस्य निष्पत्तिः। अनवसितशब्देनानिर्णितरूपार्थो बुद्ध्यते । तथा च यत्पक्षनाम्ना च कथितं स एव सूत्रे प्रकरणशब्दस्यार्थः ।

स्वपक्षपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसम इति न्यायसारे प्रकरणसमलक्षणम्। तस्य परिष्कारो भूषणे कृतः । तथाहि – प्रकरणयोः पक्षप्रतिपक्षयोः सिद्धौ समः त्रिरूपत्वेन, त्रिरूपत्वञ्च – पक्षधर्मत्वम्, सपक्षे सत्त्वम्, विपक्षाद्व्यावृत्तिरिति। 'यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः' इति सूत्रम् ।

यस्मान्नित्यानित्यविशेषानुपलम्भात् किमयं नित्यो वाऽनित्य इत्येषा प्रकरणचिन्ता, स विशेषधर्मानुपलम्भो हेतुत्वेनोक्तः प्रकरणसमः। यथा नित्यः शब्दोऽनित्यधर्मानुपलब्धेः, अनित्यः शब्दो नित्यधर्मानुपलब्धेरिति । विरुद्धव्यभिचारी तर्हि प्रकरणसमः, विपक्षधर्मानुपलब्धेरिति, उच्यते - तथापि सत्त्वादे-र्विपक्षधर्मस्यानुपलब्धिरुभयाऽसिद्धिविशिष्टधर्मानुपलब्धिश्चान्यतरासिद्धेति । अथ योऽकृतकत्वाद्यनुपलब्धेरसिद्धतां नोद्भावयितुं शक्नोति, तद्विषयोऽयं प्रकरणसमः, विरुद्धाव्यभिचारिणोऽपि तर्हि ये दोषान्तरं नोद्भावयितुं शक्नुवन्ति तान् प्रति किन्न हेत्वाभासान्तरत्वमिष्यते ? पक्षसपक्षान्यतरत्वादेश्चानेन लक्षणेन कथं संग्रह इति ? उच्यते - यस्मात्प्रतिपक्षसिद्धाववविशेषेण प्रतीयमानात् प्रकरणचिन्ता भवति, स प्रकरणसम इत्येतावदेव व्यापकं लक्षणम् । निर्णयार्थमपदिष्टम्, इत्येतदन्यार्थम् । अन्योऽपि हेत्वाभासो येनैव निर्णयार्थमपदिष्टस्तस्यैव निग्रहस्थानं न पुनः प्रतिवादिना प्राश्निकेन वानुभाषणार्थ-मपदिष्टोपीति[१३] ।

न्यायसूत्रे चतुर्थप्रकारहेत्वाभासत्वेन साध्यसमो विवृतः । तदर्थं सूत्रम् - 'साध्या-विशिष्टः साध्यत्वात् साध्यसमः[१४]' इति । यः पदार्थः साध्यधर्मेण सह तुल्यः स एव साध्यसमहेत्वाभासः । किमर्थं साध्यधर्मेण सहाविशिष्टः ? उच्यते - साध्यत्वादिति। अत्रायमभिसन्धिः - प्रमाणसिद्धः पदार्थविशेषः कस्यापि साध्यधर्मस्य साधकहेतुर्भवितु-मर्हति । परन्तु वादिनः साध्यधर्मवत् स हेतुर्यदि पूर्वमसिद्धस्तर्हि स हेतुरपि प्रमाणेन साधनीयः । अत एव साधनीयत्वप्रयुक्तः स हेतुः साध्यधर्मतुल्यः । अत एव साध्यसमहे-त्वाभास इति । भाष्यकारेण 'द्रव्यं छायेति साध्यं गतिमत्त्वात् इति हेतुः साध्येनाविशिष्टः साधनीयत्वात् साधसमः[१५]' इत्युक्तम् । अत्र प्रतिवादिनां मते छायायां गतिमत्त्वमसिद्धम्। अयमपि साध्यवत्साधनीयः । प्रतिवादिनां मते आलोकविशेषाभावस्य छायात्वेन ग्रहणं न तत्र गतिक्रिया । गतिमत्त्वन्तु भ्रमः । किरणावलीकारेणोदयनाचार्येणापि छायायाः अभावार्थः स्वीक्रियते ।

साध्यसमहेत्वाभासं भाष्यकारपरवर्त्तिनो व्याख्यातारोऽसिद्धहेत्वाभासनाम्ना स्वीकृत्याश्रयासिद्धस्वरूपासिद्धान्यथासिद्धभेदेन साध्यसमस्य भेदत्रयं व्याख्यातवन्तः। परवर्त्तिनिकाले गङ्गेशोपाध्यायेनाश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्चेति भेदेनासिद्धिभेदा विचारिताः ।

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

भासर्वज्ञेणासिद्धेर्बहवो भेदाः सोदाहरणं प्रदर्शिताः । तथाहि – 'तत्रासिद्धभेदास्तावत् – स्वरूपासिद्धो यथा – अनित्यः शब्दः चाक्षुषत्वात् । व्यधिकरणासिद्धो यथा – अनित्यः शब्दः पटस्य कृतकत्वात् । विशष्यासिद्धो यथा – अनित्यः शब्दः सामान्यवत्त्वे सति चाक्षुषत्वात् । विशेषणासिद्धो यथा – अनित्यश्शब्दः चाक्षुषत्वे सति सामन्यवत्त्वात्। भागासिद्धो यथा – अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् । आश्रयासिद्धो यथा – अस्ति प्रधानं विश्वपरिणामित्वात् । आश्रयैकदेशासिद्धो यथा – नित्याः प्रधानपुरुषेश्वराः, अकृतकत्वात् । व्यर्थविशेष्यासिद्धो यथा अनित्यः शब्दः कृतकत्वे सति सामान्यवत्त्वात्। व्यर्थविशेषणासिद्धो यथा – अनित्यश्शब्दः सामान्यवत्त्वे सति कृतकत्वात्। सन्दिग्धासिद्धो यथा – धूमवाष्पादिविवेकानिश्चये, कश्चिदाह – अग्निमानयं प्रदेशः धूमवत्त्वात् । सन्दिग्धविशेष्यासिद्धो यथा अद्यापि रागादियुक्तः कपिलः पुरुषत्वे सत्याद्याप्यनुत्पन्नतत्त्वज्ञानत्वात् । सन्दिग्धविशेषणासिद्धो यथा – अद्यापि रागादियुक्तः कपिलः सर्वदा तत्त्वज्ञानरहितत्वे सति पुरुषत्वात् । त एतेऽसिद्धभेदा यदोभयवाद्यसिद्धत्वेन विवक्षिताः, – तदोभयवाद्यसिद्धा भवन्ति । यदा त्वन्यतरवाद्यसिद्धत्वेन विवक्षिताः, तदाऽन्यतरवाद्यसिद्धा भवन्ति[१६]' इति ।

कारिकावल्याम् –

आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।

व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा[१७]।। इति ।

असिद्धभेदान् विश्वनाथ उक्तवान् । प्रथमत आश्रयासिद्धेः पक्षासिद्धिः इति नामान्तरं विश्वनाथपञ्चाननेन व्यपदिष्टम् । तथा च आश्रयतावच्छेदकरूपविशिष्टाश्रयस्यासिद्धि–रित्यर्थो जायते । पक्षतावच्छेदकाभाववत्पक्षः । यस्मिन्ननुमाने आश्रयः पक्षो वा न निश्चितः, तस्मिन्ननुमाने प्रयुक्तो हेतुराश्रयासिद्धः, पक्षासिद्धो वा । यथा 'गगनारविन्दं सुरभि, अरविन्दत्वात् सरोजारविन्दवत् ।' अत्र गगनारविन्दरूपे पक्षेऽरविन्दत्वरूपेण हेतुना सुरभित्वरूपस्य साध्यस्य सिद्धिः इष्यते । परन्तु अरविन्दत्वरूपस्य हेतोः पक्षवृत्तित्वं नास्ति । गगनारविन्दरूपपक्षस्यैवासिद्धत्वात् प्रमाणागोचरत्वाद्वा । गगनत्वविशिष्टारविन्द–रूपपक्षासिद्धेश्च सौरभ्यानुमितिर्न

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सम्भवति । अतोऽरविन्दत्वरूपस्य हेतोः आश्रयस्य पक्षस्यैवाभावादयमाश्रयासिद्धो हेतुः । पक्षस्यासिद्धो यथा पक्षासिद्ध आश्रयासिद्धो वा हेत्वाभासो भवति । तथा पक्षविशेषणस्यासिद्धौ चाश्रयासिद्धो भवति । 'मणिमयः पर्वतो वह्निमान् धूमात्' इत्यत्र पक्षभूतस्य पर्वतस्य यद् विशेषणं मणिमयत्वं, तस्यासिद्धत्वादत्राप्याश्रयासिद्धो हेत्वाभास इति ।

अत एवोक्तं कारिकावल्याम् – 'पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः[१८]' इति। अनन्तरं स्वरूपासिद्धिर्विचार्यते । पक्षे हेत्वाभावः स्वरूपासिद्धिरिति । स्वरूपासिद्धि–दोषस्य प्रकृतपक्षे प्रकृतहेतुमत्ताज्ञानप्रतिबन्धकत्वम् । पक्षधर्मताज्ञानप्रतिबन्धकत्वमिति लक्षणं यावत् । पक्षेऽविद्यमानहेतुः स्वरूपासिद्धः । यो हेतुः पक्षे स्वरूपत एवासिद्धः = यत्र हेतुर्वस्तुतः पक्षे न विद्यते, स हेतुः स्वरूपासिद्धः ।

तथा च हेत्वाभावविशिष्टपक्षस्य ज्ञानात्पक्षविशेष्यकहेतुप्रकारकपरामर्शस्योत्पत्तिर्न सम्भवतीति परामर्शप्रबन्धो जायते । यथा शब्दो गुणः चाक्षुषत्वाद्रूपवत् । अत्र चाक्षुषत्वरूपो हेतुः शब्दे नास्ति, शब्दस्य चक्षुषत्वाभावात्, श्रवणत्वादित्ययं चाक्षुषत्वरूपो हेतुः स्वरूपासिद्धिः इति ।

सोयं स्वरूपासिद्धः शुद्धासिद्धभागासिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन चतुर्विधः। तत्र 'शब्दो गुणश्चाक्षुषत्वादि'त्यत्र शुद्धासिद्धः, द्वितीयस्तु 'घटपटादिकं पृथिवी, घटत्वादि'त्यत्र, तृतीयस्तु 'वायुः प्रत्यक्षः, रूपवत्त्वे सति स्पर्शवत्त्वादित्यत्र', चतुर्थस्तु 'वायुः प्रत्यक्षः, स्पर्शवत्त्वे सति रूपवत्त्वादि'त्यत्र, एवं सम्बन्धासिद्धोऽपि बोध्यः । यथा वायुः – द्रव्यं – संयोगेन स्पर्शवत्त्वादिति । सर्वत्र लक्षणनिर्माणेऽपि यदि अव्याप्तिग्रस्तं तदा भागासिद्धेऽन्तर्भवति, यदि अतिव्याप्तिग्रस्तं तदा व्याप्यत्वा–सिद्धेऽन्तर्भवति, यदा तु असम्भवग्रस्तं तदा स्वरूपासिद्धेऽन्तर्भवति । एवं ज्ञानानुकूल–कल्पनावशात् नानाविधोऽपि भवति स्वरूपासिद्धिदोषः । यथा साधनतावच्छेदका–वच्छिन्नसाधनाभाववत्पक्षः, तादृशसाधनाभावव्याप्यवत्पक्षः, साधनवदन्योन्या–भाववान्पक्षः, तादृशान्योन्याभावव्याप्यवान्पक्षः, पक्षे साधनतावच्छेदकावच्छिन्नप्रति–योगिताकसाधनाभावः, पक्षे तादृशसाधनाभावव्याप्यः, पक्षे साधनतावच्छेदकावच्छिन्न–साधनवदन्योन्याभावः,

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

पक्षे तादृशान्योन्याभावव्याप्यश्चेति । समानप्रकारकज्ञानस्यैव प्रतिबन्धकत्ववादिनां नव्यानां मते तु – साधनतावच्छेदकावच्छिन्नसाधनाभाव–वत्पक्षादिरूपः चतुर्विधएवेति ।

व्याप्यत्वासिद्धिर्विचार्यते । कारिकावल्याम् – 'व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्[१९]' इति कारिकया व्याप्यत्वासिद्धेः समुल्लेखः कृतः । पर्वतो वह्निमान्, नीलधूमात् इत्यादौ नीलधूमत्वादिकं न हेतुतावच्छेदकं, गुरुत्वात् । स्वसमानाधिकरणव्यापता–वच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । अत्र धूमत्वमेव हेतुतावच्छेदकम्। तथा च गुरुधर्मो नीलधूमत्वधर्मः । तत्सामानाधिकरणो धूमत्वम् । अथ च प्रकृतसाध्य–व्याप्यतावच्छेदकं धर्मान्तरं धूमत्वम्, तद्घटितमेव व्यर्थविशेषणघटितं नीलधूमत्वं न तु तद्घटितम् अतो न नीलधूमत्वं व्याप्यतावच्छेदकमिति । स्वसमानाधिकरणप्रकृत–साध्यव्याप्यतावच्छिन्नप्रतियोगिताकभेदकूटविशिष्टधर्म एव व्याप्यतावच्छेदक इति फलितार्थः । सोपाधिको हेतुर्व्याप्यत्वासिद्ध इत्यन्नंभट्टपादाः । यस्मिन् हेतौ व्याप्तिरसिद्धा सहेतुर्व्याप्यत्वासिद्धः। हेतौ असिद्धिश्चोपाधिमत्त्वेनैव भवति । उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः । 'साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा । स उपाधिर्भवेत्......[२०]।' यः पदार्थः साध्यस्यानुमितिविधेयस्य व्यापकः, हेतोश्च साध्यानुमापकस्याव्यापकः स एवोपाधिपदाभिधेयः । साध्यसमानाधिकरणात्यन्ता–भावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधन–व्यापकत्वमिति अन्नभट्टपादाः । साध्याधिकरणे विद्यमानस्यात्यन्ताभावस्याप्रतियोगी साध्यव्यापकः । हेत्वधिकरणे विद्यमानस्यात्यन्ताभावस्य प्रतियोगी साधनाव्यापकः। साध्यस्य सत्त्वे यस्य नियमेनोपस्थितिः, स साध्यव्यापकः । साधनसत्त्वे यस्य नियमेनोप–स्थितिर्नास्ति स साधनाव्यापक इति सरलार्थः । यथा 'पर्वतो धूमवान् वह्निमत्त्वाद्' इत्यत्रार्द्रेन्धनसंयोगोपाधिः । तथाहि धूमः साध्यः, वह्निश्च साधनम् । यत्र धूमस्तत्रोर्द्रे–न्धनसंयोग इति आर्द्रेन्धनसंयोगस्य धूमरूपसाध्यव्यापकत्वम् । यत्र वह्निस्तत्रान्द्रन्धन–संयोगस्य नियमेनोपस्थितिर्नास्ति, अयगोलकादौ वह्निसत्त्वेऽपि आद्रन्धनसंयोगाभावाद्।

न्यायसूत्रे कालातीतहेत्वाभासः पञ्चमहेत्वाभासत्वेन परिगणितः । तदर्थं सूत्रं च 'कालात्ययापदिष्टः कालातीतः[२१]' इति । कालात्ययेन युक्तो यस्याथैकदेशोऽपदिश्यमानस्य स कालात्ययापदिष्टः कालातीत उच्यते इति न्यायभाष्यकारः । तथा च यस्य हेतोः कालातीतहेत्वाभासो भवति । तदर्थमुदाहरणं दत्तं भाष्यकारेण – 'नित्यशब्दः संयोग–व्यङ्गत्वाद्रूपवत्' इति ।

न्यायसारकारेण प्रमाणबाधिते पक्षे वर्त्तमानहेतुः कालात्ययापदिष्टः इत्युक्तम् । तेन च निर्दिष्टपक्षोपन्यासानन्तरं हेतूपन्यासकालः तदत्यये नापदिष्टः कालमतीतः कालातीतः इति भावः फलितः । कालात्ययोपदिष्टश्च बाधितनाम्ना प्रसिद्धः। कारिकावल्याम् – 'साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः[२२]' इत्यनेन बाधितलक्षणं समुपपन्नम् । अत्र पक्षशब्देन साध्यतावच्छेदकविशिष्ट इत्यर्थो ग्राह्यः । तेन पक्षे यत्साध्यमनुमातुमिष्यते, तस्मिन् पक्षे तस्यैव साध्यस्याभावो यदि प्रमाणान्तरेण सिद्ध्यति, तर्हि तत्र हेतुर्बाधितो भवति । प्रमाणान्तरं चात्र प्रत्यक्षं शब्दोपमानं वा । बाधितस्य साक्षादनुमितिप्रतिबन्ध–कत्वम्। यथा वह्निरनुष्णो द्रव्यत्वात् जलवद् इत्यनुमाने वह्नेरनुष्णत्वं साध्यम् । तद्भाव उष्णत्वञ्च स्पार्शनप्रत्यक्षेण गृह्यते । तथा च प्रत्यक्षेणानुष्णत्वरूपसाध्यस्याभावो निश्चीयते। तेन च साध्यानुमितिप्रतिबन्धकः क्रियते । हेतोर्बाधितसाध्यकत्वात् हेतुरपि बाधित इत्युच्यते । एवं योगो न 'स्वर्गहेतुः क्रियात्वात् गमनवद्' इत्यनुमानेन यागरूपे पक्षे स्वर्गहेतुत्वाभावः साध्यः । श्रुत्या तु यागरूपे पक्षे स्वर्गहेतुत्वमेव सिद्ध्यतीति अत्र क्रियारूपो हेतुर्बाधितः । तस्मिन् हेतौ बाधरूपदोषो वर्तते इति ।

**पादटिप्पणी**

१. अनैकान्तिकः सव्यभिचारः। न्या. सू., १/२/५

२. न्या. सू., भा., १/२/५

३. क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः। न्या. सू., २/१/२०

४. तत्र साध्याभाववद्वृत्तिः साधारणः । त. सं., अनुमा.

५. का. व., ७१

६. का. व., ७२
७. का. व., ७३
८. का. व., ७३
९. का. व., ७४
१०. न्या. सू., भा. १/२/६
११. का. व., ७४
१२. न्या. सू., १/२/७
१३. न्या. भू., पृ. ३१०
१४. न्या. सू., १/२/८
१५. न्या. सू. भा., १/२/८
१६. न्या. सा., पृ. ३११-३१२
१७. का. व., ७५
१८. का. व., ७६
१९. का. व., ७७
२०. का. व., १३८
२१. न्या. सू., १/२/९
२२. का. व., ७८

**सहायकग्रन्था :**


१. *कारिकावली* - श्रीविश्वनाथन्यायपञ्चाननः, वाराणसी : चौखम्बाकृष्णदास अकादमी, पु. मु., वि. सं. २०५९

२. *तर्कसंग्रहः* - अन्नंभट्टः, संपा. - रा. गो. शुक्ल, दिल्ली : भारतीयविद्याप्रकाशन, २००२

३. *तर्कामृतम्* - जगदीशतर्कालङ्कारः, संपा. - पीयूषकान्तदीक्षितः, दिल्ली : नागपब्लिशर्स, जबाहरनगरम्, २००३

४. *तत्त्वचिन्तामणिः* - गङ्गेशोपाध्यायः, ब्रजजीवनप्राच्यभारतीग्रन्थमाला, चौखम्बा-संस्कृतप्रतिष्ठानम्, १९९०

५. *न्यायकोशः* - भीमाचार्यः, पुना : भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९७८

६. *न्यायसिद्धान्तमुक्तावली* (किरणावलीसमन्विता)- विश्वनाथपञ्चाननः, व्याख्या, पं. श्रीकृष्णवल्लभाचार्यः, वाराणसी : चौखम्बासंस्कृतसंस्थानम्, १९९०

७. *न्यायसूत्रम्* - महर्षिगौतमः, वाराणसी : काशिसंस्कृतग्रन्थमाला ४३, १९७०

८. *प्रशस्तपादभाष्यम्* (न्यायकन्दलीसहितम्) – प्रशस्तपादाचार्यः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९७७
९. *मानमेयोदयः* – नारायणद्वयी, वाराणसी : चौखम्बाविद्याभवनम्, १९९६ ।
१०. *लक्षणमाला* – उयनाचार्यः, दरभङ्गा : मिथिलाविद्यापीठग्रन्थमाला, त्रयोदशपुष्पम्, १९६३ ।